# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – दिसम्बर –२०१८

| | | |
|---|---|---|
| *कक्षा- आचार्य* (SEM- 3) | **प्रश्नपत्रम्-३** | *गुणाः -७०* |
| *विषयः- रामानुजवेदान्तः* | *कोड-* CC 5.3.8<br>(NEW SYLLABUS) | *समयः - १० तः ०१* |
| *दिनाङ्कः-०६-१२-२०१८* | *सन्दर्भग्रन्थः - वेदार्थसंग्रहः रामानुजाचार्यविरचितः* | |

### प्रथमान्वितिः

**प्रश्नः १ कस्यचिद् एकस्य प्रश्नस्य व्याख्यात्मकम् उत्तरं लिखत । ०५**

*(१) भास्करमतं संक्षेपेण व्याख्यात ।*

*(२) यादवमतं संक्षेपेण व्याख्यात ।*

**प्रश्नः २ कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत । १०**

*(१) यथाग्रन्थं शाङ्करमतं निराकुरुत ।*

*(२) शोधकवाक्यानां सविशेषपरत्वोपपादनं लिखत ।*

### द्वितीयान्वितिः

**प्रश्नः ३ कस्यचिद् एकस्य व्याख्यात्मकम् उत्तरं लिखत । ०५**

*(१) भेदाभेदवादनिरासं यथाग्रन्थम् उपपादयत ।*

*(२) अविद्यास्वरूपानुपपत्तिं यथाग्रन्थं स्पष्टयत ।*

**प्रश्नः ४ कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत । १०**

*(१) तिरोधानानुपपत्तिं यथाग्रन्थं निरूपयत ।*

*(१) शास्त्रस्य प्रत्यक्षबाधकत्वं निराकुरुत ।*

### तृतीयान्वितिः

**प्रश्नः ५ कस्यचिदेकस्य व्याख्यात्मकम् उत्तरं लिखत । ०५**

*(१) यादवप्रकाशमतस्य निराकरणं ग्रन्थोक्तदिशा लिखत ।*

*(२) ब्रह्मणः शरीरशरीरिभावं निरूपयत ।*

**प्रश्नः ६ कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत । १०**

*(१) भास्करमतं यथाग्रन्थं निराकुरुत ।*

*(२) ब्रह्मणः सर्वशब्दवाच्यत्वे प्रमाणानि प्रदर्शयत ।*

## चतुर्थान्वितिः

**प्रश्नः ७ कस्यचिदेकस्य व्याख्यात्मकम् उत्तरं लिखत । ०५**

*(१) "प्रशासितारं सर्वेषामणीयांसमणीयसाम् ।*

*रुक्माभं स्वप्नधीगम्यं विद्यात्तु पुरुषं परम् ॥" इति श्लोकस्य व्याख्यां लिखत ।*

*(२) "एनमेके वदन्त्यग्निं मरुतोऽन्ये प्रजापतिम् ।*

*इन्द्रमेके परे प्राणमपरे ब्रह्म शाश्वतम् ॥" इति श्लोकार्थं व्याख्यात ।*

**प्रश्नः ८ कस्यचिद् एकष्य प्रश्नस्य निबन्धात्मकम् उत्तरं लिखत । १०**

*(१) विरुद्धवद्भासमानानां वेदान्तवाक्यानां समन्वयप्रकारं निबध्नीत ।*

*(२) व्योमातीतवादं निरसत ।*

**प्रश्नः ९ केषाञ्चन दशानाम् अतिलघूत्तराणि लिखत । १०**

*१ वेदार्थसंग्रहस्य मंगलाचरणं लिखत ।*

*२ "निर्विशेषज्ञानमात्रमेव ब्रह्म" इति के वदन्ति ?*

*३ मिथ्यावादः कस्य मतम् ?*

*४ जीवात्मा कथं ब्रह्मात्मकः भवति ?*

*५ सर्वेषां जनानाम् अन्तः कः प्रविष्टः ?*

*६ निर्विकल्पकप्रत्यक्षेऽपि किं वस्तु प्रतीयते ?*

*७ भगवद्रामानुजाचार्यैः अविद्यायां कति अनुपपत्तयः दर्शिताः ?*

*८ अहङ्कारः कतिविधः ?*

*९ ब्रह्म अस्य जगतः कीदृशं कारणम् ?*

*१० "तत्त्वमसि" इति महावाक्यं कस्याम् उपनिषदि श्रूयते ?*

*११ "नारायणः" कः ?*

१२ वेदार्थसंग्रहः केन लिखितः*?*

*१३ ब्रह्मणः स्थूलभावः किम् उच्यते ?*

*१४ रामानुजमते कति तत्त्वानि स्वीक्रियते ?*

*१५ श्रीभाष्यम् केन लिखितम् ?*

*--oo--*